International Journal of Sanskrit Research 2019; 5(2): 31-34

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(2): 31-34
© 2019 IJSR
www.anantaajournal.com
Received: 11-01-2019
Accepted: 13-02-2019

**रेखा रानी**
संस्कृत शोधच्छात्रा, तेलुगु & प्राच्यभाषाविभागः,
आचार्यनागार्जुनविश्वविद्यालयः,
नागार्जुननगरम्, आन्ध्रप्रदेशः

Correspondence
**रेखा रानी**
संस्कृत शोधच्छात्रा,
तेलुगु & प्राच्यभाषाविभागः,
आचार्यनागार्जुनविश्वविद्यालयः,
नागार्जुननगरम्, आन्ध्रप्रदेशः

# “शोधपत्रसारांशः” “श्रीरामकीर्तिमहाकाव्ये अङ्गीरसः”

## रेखा रानी

**प्रस्तावना:-**

संस्कृतसाहित्ये विंशे एकविंशे च शताब्दे लब्धप्रतिष्ठानां महाकवीनां मध्ये प्रथमगण्याःतत्रभवन्तः श्रीमन्तः डाॅ सत्यव्रतशास्त्रिवर्याः समुल्लसन्ति । संस्कृतसाहित्ये इदं प्रथमतया “ज्ञानपीठ” पुरस्कारेण पुरस्कृताः श्रीमन्तः सत्यव्रतशास्त्रिमहोदयाः आधुनिकसंस्कृतसाहित्ये विशिष्टस्थानं लभन्ते । श्रीमन्तः सत्यव्रतशास्त्रिणः “विद्यावाचस्पतिः”, “विद्यामार्तण्डः”, “महामहोपाध्या”, “पद्मभूषण” प्रभृतिभिः उपाधिभिः विभूषिताः विलसन्ति |

“भूम्नादीप्यत योऽधिपण्डितसभं सामान्यपद्मश्रिया
पश्चात्तस्य बभाविदम्प्रथमतापि ज्ञानपीठेऽमले |
सोऽयं सम्प्रति पद्मभूषणकरः स्वैरं चकास्ति ध्रुवम्
प्रेक्षावच्चरमोऽभिरामचरितः शास्त्री स सत्यव्रतः ||”१|इति|

१) श्रीरामकीर्तिमहाकाव्यम्,आमुखम्,पृ. सं.- ३

श्रीमन्तः सत्यव्रतशास्त्रिणः थाइदेशस्य कस्मिंश्चित् विश्वविद्यालये कञ्चित् कालं यावत् Visiting Professor रूपेण कार्यमकुर्वन् । तदा थाइदेशे परम्परारूपेण श्रूयमाणा रामकथा श्रीरामकीर्तिमहाकाव्यस्य कथावस्तुरूपेण स्वीचकार |

“यावत् स्थास्यन्ति गिरयः सरितश्च महीतले |
तावद् रामायणकथा लोकेषु प्रचरिष्यति ||” २

इत्यनेन श्लोकेन वाल्मीकिमहर्षिः रामकथायाः विश्वव्यापकत्वं निर्दिशति |

श्रीरामकीर्तिमहाकाव्ये अङ्गी रसः -
श्रीरामकीर्तिमहाकाव्ये पञ्चविंशतिः सर्गाः सन्ति | अस्मिन्
महाकाव्ये अन्ये रसाः अपि सन्ति परम् अङ्गी रसस्तु वीरः अस्ति |
सर्वप्रथमं रसस्वरुपं निरुपयिष्यामः|
विश्वनाथकविराजः साहित्यदर्पणे रसस्वरूपस्य वर्णनम् इत्थं कृतवान् -

"रस एवात्मा साररुपतया जीवनाधायको यस्य |
तेन विना तस्य काव्यत्वानङ्गीकारात् ||"३ |इति|

अर्थात् रस एव काव्यस्य आत्मा अस्ति | अथ वीरो नामोत्तमप्रकृतिरुत्साहात्मकः | अस्य वर्णः गौरः, देवता च महेन्द्रदेवः अस्ति |

२) वाल्मीकिरामायणम्,बालकाण्डः, द्वि.स., श्लो. सं. - ३६
३) आचार्यविश्वनाथः, साहित्यदर्पणः, तृत्तीयपरिच्छेदः

भरतमुनिः स्वकीयनाट्यशास्त्रे वीररसस्य विषये आह-

"उत्साहाध्यवसायादविषादित्वादविस्मयमोहात् |
विविधादर्थविशेषाद्वीररसो नाम सम्भवति ||" ४

"दानवीरं धर्मवीरं युद्धवीरं तथैव च|
रसं वीरमपि प्राह ब्रह्मा त्रिविधमेव हि ||" ५

श्रीरामकीर्तिमहाकाव्यस्य चतुर्थे सर्गे सीतास्वयंवरे यदा एकोऽपि राजकुमारःधनुर्ज्यारोपणाय समर्थः नाऽभवत् तदा श्रीरामः लीलया तद् दिव्यधनुषम् उत्थापितवान् |

"उत्थापयामास धनुः प्रवीरः
शार्वं गरीयो ननु हेलयैव |
उत्थापने तच्च बभूव भग्नं
स सीतया चापि वृतो बभूव ||" ६

श्रीरामकीर्तिमहाकाव्यस्य अष्टमे सर्गे शापवशात् दरभिनामकः महिषः स्वपितरं युद्धे निहत्य, गर्वोन्मत्तः सन् सःबालिनं युद्धाय आहूतवान् | तयोर्मध्ये घोरतरः संग्रामः अभवत् |

४) भरतमुनिः, नाट्यशास्त्रम्, षष्ठः अध्यायः, श्लो.सं. - ६७
५) भरतमुनिः, नाट्यशास्त्रम्, षष्ठः अध्यायः,श्लो.सं.- ७९
६) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्,चतुर्थःसर्गः,श्लो.सं.- ५८

"अत्रान्तरेऽभून्निहतो नियुद्धे
श्रीवालिनाऽसौ महिषा दुरात्मा |
प्रवाहिता यस्य बभूव कायाद्
रक्तस्य धाराऽगुरूनिम्नगेव ||" ७

अस्मिन् युद्धे बालिना दुरात्मा महिषः हतः |
त्रयोदशसर्गे रामान्वेष्णतत्परः हनूमान् पाताललोकं गच्छति स्म | तत्र मत्स्यानुः सरसः अन्तः गच्छन्तं हनूमन्तं प्रतिरुणद्धि स्म | तयोर्मध्ये भीषणःसंग्रामः प्राचलत् |

"रुद्धे कपौ वीरवरेण तेन
भयङ्करं युद्धमभूत्प्रवृत्तम् |
शौर्यं च वीर्यं च पराक्रमश्च
यत्रोभयोश्चित्रमिवाविरासन् ||" ८

मत्स्यानुः हनूमान्सुवर्णमत्स्यायाः पुत्रः आसीत् | हनूमान् तं बालं प्रावोचत् - "इदं प्रथमतया त्वामेव पश्यामि येन मम कठिनप्रहाराः सोढा इति |" हनूमतः वचनं श्रुत्वा सः बालः मच्छानुः हसन्

एवमभाषत- “अहं वायुनन्दनस्य हनूमतः पुत्रोऽस्मि | राक्षसराजस्य रावणस्य पुत्री सुवर्णमत्स्या मम जननी | एवं वायुदेवस्य, रावणस्य च भीषणशक्तिः मयि विद्यमाने स्तः |”इति |

७) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, अष्टमसर्गः, श्लो. सं. - १८
८) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, त्रयोदशसर्गः, श्लो. सं. - ३६

त्रयोदशसर्गे हनूमान् मार्गे आगताः बाधाः पारयित्वा अग्रे गच्छति स्म | ततःअग्रे गच्छति हनुमति कश्चन मशकराशिःहनूमन्तं परितःस्थितः आसीत् | वानरवीरः हनूमान् अत्यल्पे समये मशकसमूहान् पाणौ गृहीत्वा निष्पीडितवान् |

“शतं सहस्रं मशकावलेर्द्राक्
पाणौ गृहीत्वा स विनिष्पिपेष |
अल्पेन कालेन च वातवत्सो
घनावतीं वात इवाच्छिनत्ताम् ||” ९

अन्ते धीमान् वीर्यवांश्च हनूमान् अत्यल्पे समये एव पाताललोकं प्राप्तवान् | तत्र हनूमत्पातालराज्ययोर्मध्ये घोरतरः संग्रामः प्रावर्तत |

“दण्डादण्डि मुष्टीमुष्टि दन्तादन्ति कचाकचि |
हनुमन्मैयराबो तौ न्ययुद्ध्येतां परस्परम् ||” १०

वानरवीरः आञ्जनेयः क्षणकाले एव मुष्टिभिः मैयराबस्य आत्मानं निष्पीडितवान् | सद्यः मैयराबः विगतचेतनो भूत्वा भूमौ न्यपतत् | एवं कपिश्रेष्ठः हनूमान् मैयराबं हत्वा श्रीरामं च ततः विमुच्य सन्तुष्टान्तरङ्गः रामेण सह समुद्रतीरगतं शिविरं प्रत्यागच्छत् |

९) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, चतुर्दशसर्गः, श्लो. सं. - १०
१०) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, चतुर्दशसर्गः, श्लो. सं. - ६६

उपसंहारः -
यद्यपि अस्मिन् महाकाव्ये क्वचित् शृङ्गाररसः, क्वचित् करुणरसः, क्वचित् रौद्ररसश्च दृग्गोचरी भवति तथापि वीररसः एव प्रधानरसः अस्ति | वीररसेऽपि ‘युद्धवीरः’ एव मुख्यतया दृश्यते | यथा सप्तदशसर्गे -

“रावणो बध्यकोटित्वं जगाम परमास्त्रवित् |
अहन्यत् च तीक्ष्णाग्रैः शरैः रामाभिवर्षितैः || “११

श्रीरामेण रावणः वधार्हः भवति |

अष्टादशसर्गे रावणस्य मित्रं महीपाल देवासुरः रावणस्य परलोकगतं सर्वं वृतान्तं ज्ञात्वा विभीषणं निहत्य रावणेन सह स्थितां मैत्रीं प्रकटयितुमिच्छति स्म | विभीषणस्य रक्षणार्थं श्रीरामः हनूमान् प्रेषयति स्म | किंचित् समयानन्तरं लङ्कापुरीं प्राप्य सः कपिवीरः महीपालदेवासुरं द्वन्द्वयुद्धाय आहूतवान् | परं महीपालदेवासुरः स्ववचनैः कपिवीरस्य परिहासं कुर्वन् कथयति स्म यत् -“यद्यहं त्वया वानरेण सह द्वन्द्व युद्धं कुर्याम् तर्हि अहं परिहासभाजनं भविष्यामि | असुरेन्द्रेण सह कपेः द्वन्द्वयुद्धं कथं शोभनं स्यात् | ”
राक्षसराजस्य निष्ठुरं वचनं श्रुत्वा वानरवीरः एवं प्राह -“नैव जात्याऽस्ति कश्चिद् बली वाऽबली वा | द्वन्द्वयुद्धे आवयोः पराक्रमस्य सत्यपरीक्षा भवति |”

“विदीर्णमात्रे तदुरस्यपासुः
पपात भूमौ दशकण्ठमित्रं |
साध्ये च सिद्धिं समवाप्य वीरः
स्वधाम धीरो हनुमाञ्जगाम ||”१२

आञ्जनेय: रावणस्य मित्रस्य उरः विदीर्य तं भूमौ पातयामास | समाधिगतकार्यसिद्धिः हनूमान् स्वप्रदेशम् आगच्छत् |

११) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, सप्तदशसर्गः, श्लो.सं.-५८
१२) श्रीसत्यव्रतशास्त्री, श्रीरामकीर्तिमहाकाव्यम्, अष्टादशसर्गः, श्लो.सं.-३३

**उपयुक्तग्रन्थसूची:**


रामायणम्:- गीता प्रेस
नाट्यशास्त्रम्:- चौखंबा सुरभारती प्रकाशन वाराणसी
साहित्यदर्पणः:- मोतीलाल बनारसीदास
श्रीरामकीर्तिमहाकाव्यम्:- श्री वेंकटेश्वर वैदिक यूनिवर्सिटि, तिरुपति, ए. पी.